अमावस्या च पूर्णिमा पर्व्वाण्येतानि राजेन्द्र! रविसंक्रान्तिरेव च" "अष्टम्यां बलिदानेन पुत्रनाशो भवेद्" ध्रुवम् पुरा० । "अष्टम्याः शेषदण्डे च नवम्या आद्य एव च । अत्र या क्रियते पूजा विज्ञेया सा महाफला" ति०त०पुरा० । "अपरपक्षाणामष्टमीष्वष्टकाः" आश्व० ।

**अष्टमकालिक** त्रि० अष्टमः कालः भोजनेऽस्त्यस्य ठन् । सार्द्धदिनत्रयोपवासानन्तरं चतुर्थदिवसे रात्रौ भोक्तरि वानप्रस्थभेदे "नक्तं चान्नं समश्नीयाद्दिवा वाहृत्य शक्तितः । चतुर्थकालिको वा स्यात् स्याद्वाप्यष्टमकालिकः" मनुः । "मुनिभिर्द्विरशनं प्रोक्तं विप्राणां मर्त्यवासिनां नित्यम्" इत्युक्त्या दिवसे वारद्वयभोजनस्य विधानात् सार्द्धत्रिदिने सप्ताहारमतीत्य चतुर्थदिवसे रात्रौ भोजने हि तथात्वं भवति ।

**अष्टमङ्गल** न० अष्टगुणितं मङ्गलम् शा०त० । "मृगराजो वृषो नागः कलशो व्यजनं तथा । वैजयन्ती तथा भेरी दीप इत्यष्टमङ्गलम्" इत्युक्तेषु "लोकेऽस्मिन्मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः । हिरण्यं सर्पिरादित्य आपोराजा तथाष्टम" इत्युक्तेषु च अष्टसु द्रव्येषु ब०व० । अत्र कर्म्म० संज्ञात्वान्न द्विगुरिति भेदः ।

**अष्टमङ्गलघृत** न० अष्टभिर्द्रव्यैर्मङ्गलार्थं घृतम् । चक्रोदत्तोक्ते घृतभेदे "वचा कुष्ठं तथा ब्राह्मी सिद्धार्थकमथापि च । शारिवा सैन्धवञ्चैव पिप्पलीघृतमष्टमम् । मेध्यं घृतमिदं सिद्धं पातव्यञ्च दिने दिने । दृढ़स्मृतिः क्षिप्रमेधः कुमारो बुद्धिमान् भवेत् । न पिशाचा न रक्षांसि न भूता न च मातरः । प्रभवन्ति कुमाराणां पिबतामष्टमङ्गलम्" ।

**अष्टमभाव** पु० अष्टमोभावः । ज्योतिषोक्ते जन्मलग्नावधिके १अष्टमस्थाने तन्वादिद्वादशभावमध्ये २अष्टमे भावे च भावश्च इष्टकालेऽंशकलाविकलादिना स्पष्टीकृतलग्नादिः । तदानयनं यथा "पूर्व्वं न तं स्याद्दिनरात्रिखण्डं दिवानिशोरिष्टघटीविहीनम् । दिवानिशोरिष्टघटीषु शुद्धं द्युरात्रिखण्डं त्वपरं नतं स्यात् । तत्काले सायनार्कस्य भुक्तभोग्यांशसंगुणात् । स्वोदयात् खाग्निलब्धं यत् भुक्तं भोग्यं रवेस्त्यजेत् । इष्टनाड़ीपलेभ्यश्च गतगम्यान्निजोदयात् । शेषं खत्र्याहतं भक्तमशुद्धेन लवादिकम् । अशुद्धशुद्धभे हीनयुक् तनुर्व्ययनांशकम् । एवं लङ्कोदयैर्भुक्तं भोग्यं शोध्यं पलीकृतात् । पूर्व्वपश्चान्नतादन्यत् प्रागवत्तद्दशमं भवेत् । सषड्भे लग्नभे जाया, तुर्य्यौ, लग्नोनतुर्य्यतः । षष्ठांशयुक् तनोःसन्धिरग्रे षष्ठांशयोजनात् । त्रयः ससन्ध्ययोभावाः षष्ठांशेनैकयुक् सुखात् । अग्रे त्रयः षडेवं ते भार्द्धयुक्ताः परेऽपि षट्" । नील०ता० । स्वस्वदेशोदयमानं देशान्तरयोगादिना आनेयम् लङ्कोदयमानानि तु मेषस्य २७८, वृषस्य २९९, मिथुनस्य ३२३, कर्कटस्य३२३ सिंहस्य २९९, कन्यायाः २७८, तुलायाः २७८, वृश्चिकस्य२९९, धनुषः ३२३ मृगस्य ३२३, कुम्भस्य २९९, मीनस्य२७८, पलानि । एतदनुसारेण दशमराशेः उदयमानं गृहीत्वा दशमभावानयनम् "खेटे भावसमे पूर्णं फलं सन्धिसमे तु खम् । हीनेऽधिके द्विसन्धिभ्यां भावे पूर्व्वापरे फलम्" नील०ता० । "भुक्तं भोग्यं खेष्टकालान्न शुध्येत् त्रिंशन्निघ्ना स्वोदयाप्तं लवाद्यम् । हीनं युक्तं भास्करे तत्तनुः स्यात् रात्रौ लग्नं भार्द्धयुक्ताद्रवेस्तु । खेटे सन्धिद्वयान्तःस्थे फलं तद्भावजं भवेत्" । नील०ता० । "अष्टमस्थाने च चिन्त्यान्याह दीपिकायाम्" "रन्ध्रायुर्म्भृतयोऽष्टमे" इति । ताजके तु अन्यान्यपि चिन्त्यान्याह । "मृत्यौ चिरन्तनं द्रव्यं मृतिर्वित्तं रणे रिपुः । दुर्गस्थानं मृतिर्नाशः परीवादो मनोव्यथा" एतानि साधारणानि चिन्त्यानि विशेषतस्तत्र ग्रहयोगादृष्टाद्युक्तं जातके यथा । "आयुःस्थानाधीश्वरः पापयुक्तः षष्ठान्त्यस्थः स्वल्पमायुस्तनोति । लग्नेशाढ्यश्चेद्दातिस्वल्पमेव दीर्घायुष्यं चाष्टमस्थः करोति । निधनतनुखभेशाः केन्द्रकोणत्रिलाभे १,२,४,५,७,९, १०,११, दधति हि विपुलायुर्भानुजोऽत्र प्रशस्तः । पनफरचतुरस्रेमध्यमं त्वायुरेते विदधति खलु नेष्टाः प्रान्त्यषष्ठे बलिष्ठाः । कमलकुमुदबन्धू मृत्युरन्ध्रान्तिमाख्ये विपदमथ धराजो द्विद्विवर्षेऽष्टमस्थः । धनलयमथ यच्छेच्छक्रतुल्ये बुधोऽब्दे क्षितिगुणदशसंख्ये रोगभोगापचारौ । अरिष्टोच्छ्वासनिर्याणोच्छ्वासयोरत्र चिन्तनम् । दैवविद्भिः सदा कार्य्यमष्टमे भावचिन्तने" जातकप० वर्षप्रवेशकाले तु अन्यथा योगविशेषात् फलमुक्तम् यथा "भौमेऽब्दपे क्रूरहते पत्या घातेऽवलोकिते । अग्निभीरग्निभे क्रूरनष्टद्विपदभे मृतिः । विपत्तिर्नरपालोत्था रिपुतस्करतोभयम् । तुर्य्ये मातुः पितृव्याद्वा मातुलाच्चि स्ततोगुरुः । लग्नेन्थिहापतिसमापतयो मृतीशाश्चेदित्थशालिन इमे निधनप्रदाः स्युः । चेत् पाकरिष्टसमये मृतिरेव तत्र सार्के कुजे नृपभयं दिवसेऽब्दशेवे । सूर्य्ये मूशरिफे सितेन जनने वर्षेऽधिकारी तथा केन्द्रे राजगदाद्भयं च रुगसृक्स्थानेऽधिकारीन्दुजे । सौम्ये क्रूरदृशा कुजस्य रुगसृग्दोषादि नाशस्थिते दग्धे बन्धमृतो विदेशतइति प्राङ्गबुधे तादृशे । भौमस्थानेऽधिकारीन्दौ गुप्तं नृपभयं रुजः । मन्देऽधिकारी खे चोपहते पीड़ाकरः